## चतुःसप्तत्युत्तरशततो ऽध्यायः।
## पाशुपतयोगविधौ प्रथमो ऽध्यायः।

व्यास उवाच।
भगवन्यत्त्वया प्रोक्तं दक्षयज्ञवधे तदा।
प्राप्य पाशुपतं योगं ब्रह्मा – – – – – – ॥ १॥
लेभिरे परमं तत्त्वं ज्ञानेन हि महामुने।
तन्मे कथय भक्ताय शिष्याय परिपृच्छते॥ २॥
कीदृशं तत्परं योगं ज्ञानं पाशुपतं शुभम्।
यज्ज्ञात्वा ब्राह्मणाः सिद्धाः प्राप्नुयुर्मोक्षमुत्तमम्।
अथ पृष्टस्तु शिष्येण प्रोवाच मुनिसत्तमः॥ ३॥
सनत्कुमार उवाच।
साधु व्यास महाबुद्धे मुमुक्षुरसि पुत्रक।
यन्मां पृच्छसि तज्ज्ञानं योगं माहेश्वरं परम्।
सर्वासां योगविद्यानां यत्तत्त्वं परिकीर्त्यते॥ ४॥
सांख्ययोगागमोपेताः सर्वाध्यात्मविशारदाः।
योगैश्वर्यमपि प्राप्य तत्त्वं नैवोपलेभिरे।
यदबुद्धा महाभाग ज्ञानं शंकरभाषितम्॥ ५॥
तद्यथा कथितं तेषां त्र्यम्बकेन दिवौकसाम्।
तत्ते ऽहं संप्रवक्ष्यामि संक्षेपात्तत्त्वनिश्चयम्।
विस्तरेण न तच्छक्यं वक्तुं वर्षशतैरपि॥ ६॥

---

Manuscripts available for this chapter: $S_1$ photos 5.18a (f. 278$^{v}$?), 5.18b (f. 279$^{r}$?), 5.19a (f. 279$^{v}$?) and 5.19b (f. 280$^{r}$?); $S_2$ (up to **17c**$^{5}$ and from **47c**$^{1}$; f. 257? is lost) exposures 162a (f. 256$^{v}$?), 211b (f. 258$^{r}$?) and 212a (f. 258$^{v}$?)

**1**(speaker indication–$c^4$)⟨$c^5$–$d^8$⟩ $S_1$, ($a^6$, $b^2$–$b^4$, $b^6$–$b^7$, $c^4$–$c^6$, $c^8$, $d^2$)⟨$d^3$–$d^8$→⟩ $S_2$ **2**⟨←$a^1$–$a^7$⟩ $S_2$ **4**($b^4$)⟨$b^5$–$b^8$⟩ $S_1$, ($c^6$–$c^8$)⟨$d^1$⟩ $S_2$ **6**($d^2$) $S_2$

---

**1a** भगवन् ] $S_1$Bh, भगवान् $S_2$ **1d** ब्रह्मा– – – – – – ] $S_2$, ब्रह्माद्यास्त्रिदिवौकसः Bh (conj.; in a note Bh suggests ब्रह्माद्यास्ते दिवौकसः.) **2a** परमं ] conj. Bh (silently), परन् $S_1$ (unmetrical) **2b** हि महा° ] $S_1$Bh, हिम⟨(वां)⟩ $S_2$ (unmetrical; corrected akṣara possibly lost) **2d** परि° ] $S_1^{pc}S_2$Bh, परे $S_1^{ac}$ **3c** यज्ज्ञात्वा ] em. Bh, यं ज्ञात्वा $S_1S_2$ • सिद्धाः ] $S_2^{pc}$Bh, सिद्धा $S_1S_2^{ac}$ **3e** अथ ] $S_1S_2$, इति Bh (conj.) • पृष्टस्तु ] $S_1^{pc}S_2$Bh, पृष्टास्तु $S_1^{ac}$ **3f** °सत्तमः ] $S_1^{pc}S_2$Bh, °सत्तम $S_1^{ac}$ **4** सनत्कुमार उवाच ] $S_1$Bh, om. $S_2$ **4b** पुत्रक ] em. Bh (silently), पुत्रकः $S_2$ **4c** तज्ज्ञानं ] $S_1$Bh, (त ज्ञान) $S_2$ (upper parts lost) **4e** सर्वासां योग° ] $S_2$Bh, सर्वसंयोग° $S_1$ **5a** °मोपेताः ] em. Bh (silently), °मोपेता $S_1S_2$ **5b** °विशारदाः ] $S_1$Bh, °विशारदा $S_2$ **6b** त्र्यम्बकेन ] $S_1S_2$, त्र्यम्बकेण Bh

तस्याहं स्थितपक्षं तु संसारोत्पत्तिनाशनम्।
मुक्तिसिद्धिप्रदं वक्ष्ये संक्षेपान्मतमुत्तमम्॥ ७॥
नमस्कृत्वा महेशानं पुरुषं भूतभावनम्।
प्रकृतेः परमं गुह्यं पुद्गलं परमेष्ठिनम्॥ ८॥
यं सांख्याः पुरुषं प्राहुः पञ्चविंशमजं विभुम्।
योगाश्चापि हि षड्विंशं व्यापिनं त्रिगुणात्मकम्॥ ९॥
यो ऽसृजत्सृष्टिकाले तु देवौ सर्वजगत्सृजौ।
प्रजापती महात्मानौ ध्यात्वा विष्णुपितामहौ॥ १०॥
तं प्रणम्य महादेवं त्र्यक्षं वरदमीश्वरम्।
प्रवक्ष्यामि मतं तस्य योगसिद्धान्तनिश्चयम्॥ ११॥
लक्षणं विद्धि योगस्य प्रोच्यमानमिदं मया।
छिद्यन्ति पशुपाशानि यस्याभ्यासान्महामुने॥ १२॥
प्रत्ययस्य बहिर्लोपो मनस्यात्मनि संस्थिते।
अभिसंधिः परे चैव ईश्वरस्यात्मनश्च ह॥ १३॥
एष योग इति व्यास कीर्तितः शम्भुना पुरा।
भवजन्मापहः सूक्ष्मः प्रपन्नानां दिवौकसाम्॥ १४॥
शरीरे तिष्ठतः पुंसो यदात्मनि मनः स्थितम्।
अवितर्कं बहिश्चैव सूक्ष्ममभ्यासयोजितम्॥ १५॥
कृतानां प्रत्ययैः सूक्ष्मैः सुखदुःखादिसंज्ञिनाम्।
अशेषलोप इत्युक्तं साधकस्य तु युञ्जतः॥ १६॥

---

**7**(a$^{4}$) S$_{1}$ **9**(a$^{8}$) S$_{2}$ **11**(d$^{3}$) S$_{2}$ **12**(c$^{5}$–c$^{6}$) S$_{1}$ **13**(a$^{5}$–a$^{6}$) S$_{1}$ **14**(d$^{8}$) S$_{1}$, (c$^{6}$, d$^{8}$) S$_{2}$ **15**⟨a$^{1}$–a$^{6}$⟩(a$^{7}$)⟨a$^{8}$⟩(b$^{1}$–b$^{3}$, b$^{6}$–b$^{8}$, c$^{7}$) S$_{1}$, ⟨a$^{1}$⟩(a$^{2}$, d$^{2}$) S$_{2}$ **16**(a$^{4}$, a$^{8}$, b$^{1}$, b$^{7}$–b$^{8}$, c$^{7}$) S$_{1}$, (b$^{5}$) S$_{2}$

---

**7a** तस्याहं स्थित° ] S$_{2}$, तस्माहन्तप° S$_{1}^{ac}$, तस्माहं (स्थि)त° S$_{1}^{pc}$, तस्याहं स्यित° Bh (typo) **8a** नमस्कृत्वा ] S$_{1}$S$_{2}$, नमस्कृत्य Bh (conj.) **9a** सांख्याः ] S$_{1}$Bh, साख्याः S$_{2}$ **9b** विभुम् ] S$_{1}$Bh, प्रभु(म्) S$_{2}^{ac}$, प्रभुः S$_{2}^{pc}$ **10a** °त्सृष्टि° ] S$_{1}^{pc}$S$_{2}$Bh, °त्सृजा° S$_{1}^{ac}$ **11a** तं ] S$_{2}$Bh, तत् S$_{1}$ **11b** त्र्यक्षं ] S$_{1}^{pc}$S$_{2}$Bh, त्र्यक्ष्यं S$_{1}^{ac}$ **12c** छिद्यन्ति ] S$_{1}$S$_{2}$, छिद्यन्ते Bh (em.) **12d** °भ्यासा-न्म° ] S$_{1}$S$_{2}^{pc}$Bh, °भ्यासा+त्+म° S$_{2}$ **13b** मनस्या° ] S$_{1}^{pc}$S$_{2}$Bh, ⟨स्या⟩+मन+स्या° S$_{1}$ **13c** अ-भिसंधिः ] S$_{1}$S$_{2}^{pc}$Bh, अभिसन्धि S$_{2}^{ac}$ **14c** सूक्ष्मः ] S$_{1}$S$_{2}^{pc}$Bh, सूक्ष्म S$_{2}^{ac}$ **14d** दिवौकसाम् ] em. Bh (silently), दिवौक(सा) S$_{1}$ (right side lost), दिवौकस S$_{2}$ (right side lost) **15a** शरीरे ] conj. Bh (silently), ⏑(री)रे S$_{2}$ **15b** यदात्मनि ] S$_{1}$S$_{2}^{pc}$Bh, यादात्मनि S$_{2}^{ac}$ • मनः स्थितम् ] S$_{2}$ Bh, म(स्थि)तं{°तः S$_{1}^{ac}$} S$_{1}$ (unmetrical) **16a** °नां प्रत्ययैः ] S$_{2}$Bh, °ना(म्प्र)त्यमैः S$_{1}$ **16b** °संज्ञिनाम् ] S$_{2}$Bh, °सं(ज्ञित)म् S$_{1}$ **16d** युञ्जतः ] S$_{1}^{ac}$S$_{2}$Bh, युञ्जत S$_{1}^{pc}$

परो महेश्वरो देवः सो ऽभिसंधेस्तु योजकः।
अभिसंधिस्तदा यस्मादीश्वरस्यात्मनश्च हि॥ १७॥
सुखादानमथैकेन भावना – – – जनात्।
प्र – – – – – – – – – – – तिष्ठतः सतः।
साधकस्य भवेन्नित्यं हानेः सिद्धमिदं फलम्॥ १८॥
अथाधिकरणं तत्र क्रमशः परि – – –।
प्रत्याहारमतो विद्यात्प्राणायामस्तथैव च।
ध्यानं च धारणा चैव योगाभ्यास उदाहृतः॥ १९॥
तिस्रो मृत्युमतिक्रम्य क्रिया हि चतुरात्मकाः।
वर्तन्ते न च वै ताभिर्मृत्युः प्रभवते मुने॥ २०॥
वश्या हि धातवस्तस्माद्भवन्त्यस्य न संशयः।
ततो ऽसौ ऽवधमृत्युश्च साधको भवति – –॥ २१॥
इमास्तर्कक्रिया व्यास मस्तके हृदि चैव हि।
अन्तरिक्षे च सर्वास्तु कीर्तिता हि न संशयः॥ २२॥
स्थानत्रयनिबद्धास्तु चतुर्लक्षणसंस्थिताः।
क्रियाः प्रमादिना नैताः शक्याः साधयितुं क्वचित्॥ २३॥
तिस्र एताः सदा मृत्युं प्रवृत्ता मोहलक्षणाः।
वियोगो न भवेत्तासु क्रियास्वेकैक – – –॥ २४॥
अज्ञाने कम्पते तासु बहिरन्तश्चरास्वपि।
क्रियासु साधको युक्तस्तथा मध्यगतासु च॥ २५॥

---

**17**⟨$a^1$–$a^2$⟩($a^3$–$a^5$, $b^1$–$b^3$) $S_1$, ($a^5$)⟨$a^6$⟩($b^4$, $c^4$–$c^5$)⟨$c^6$–$d^8$→⟩ $S_2$ (one folio lost after this) **18**($a^4$–$a^6$)⟨$b^4$–$b^6$⟩($b^7$–$c^2$)⟨$c^3$⟩($c^4$)⟨$c^5$–$d^3$⟩ $S_1$ **19**($a^7$–$b^5$)⟨$b^6$–$b^8$⟩ $S_1$ **20**($c^7$) $S_1$ **21**⟨$d^7$–$d^8$⟩ $S_1$ **24**($d^6$)⟨$d^7$–$d^8$⟩ $S_1$

---

**17b** ०संधेस्तु ] conj., (०स)न्धिस्तु $S_1$, ०स(न्धि)स्तु $S_2$, ०सन्धिस्तु Bh **17d** हि ] $S_1$, ह Bh (conj.?) **18a** सुखादान० ] $S_1^{pc}$Bh, सुखा(सान०) $S_1^{ac}$ **18b** –जनात् ] $S_1$, योजनात् Bh (conj.?) **18c** प्र– – – ] Bh, (प्र) ⏑̱ ⏑̱ ⏑̱ $S_1$ (second and fourth akṣaras have subscript य्.) **18f** हानेः ] conj., ह्यनि० $S_1$, ह्यद्रिः (?) Bh (Bh read thus in $S_1$.) **19b** परि– – – ] $S_1$, परिकीर्त्यते (?) Bh (conj.?) **19c** विद्यात् ] conj., विद्या $S_1$Bh **19e** धारणा चै० ] conj. Bh, धारणाच्चै० $S_1$ **19f** उदाहृतः ] conj. Bh, उदाहृतं $S_1$ **20b** चतुरा० ] $S_1^{pc}$Bh, चरा० $S_1^{ac}$ (unmetrical) **20c** वै ताभि० ] $S_1^{ac}$, वै(भा)नि० $S_1^{pc}$, वै– – Bh **20d** ०र्मृत्युः ] $S_1^{pc}$Bh, ०र्मृत्यु $S_1^{ac}$ **21a** धातव० ] $S_1^{pc}$Bh, धावत० $S_1^{ac}$ **21c** ऽवधमृत्यु० ] $S_1^{pc}$, ववमृत्यु० $S_1^{ac}$, पवमृत्यु० Bh (conj.?) **22a** व्यास ] $S_1^{pc}$Bh, व्यासं $S_1^{ac}$ **23a** स्थनत्र० ] em. Bh (silently), स्थनस्त्र० $S_1$ **23c** क्रियाः ] em. Bh (silently), क्रिया $S_1$ **23d** शक्याः ] em. Bh (silently), शक्या $S_1$ **24a** एताः ] $S_1^{pc}$Bh, एता $S_1^{ac}$ **24d** ०स्वेकैक– ] ०स्वेकैक– $S_1$ (last akṣara has vowel ए or ओ.), ०स्वेकैक– Bh (last akṣara has vowel ऐ.) **25a** अज्ञाने ] conj., अज्ञान $S_1$, अज्ञानं Bh (conj.?) **25c** क्रियासु ] conj. Bh, क्रिया तु $S_1$

भूतेन्द्रियमनःकालदिङ्गिवृत्तिः प्रभावतः ।
दशैवाशास्त्रयः काला भूतानीन्द्रियविस्तरः॥ २६ ॥
मनःप्रचारसंयुक्तो विषयाभावलक्षणः ।
प्रत्याहार इति प्रोक्तः पुरा भगवता स्वयम्॥ २७ ॥
दिगन्तरगमाभावान्मनसो ऽविचलस्थितौ ।
प्रत्याहारसमुत्पत्तिर्योगापत्तौ सकृद्भवेत्॥ २८ ॥
त्रिकालविषयं ज्ञानमैश्वर्योदयमेव च ।
चले मनसि नाभूतां भवेतां संस्थिते समम्॥ २९ ॥
मनः सर्वमिदं यस्मात्साधनं योगकर्मणः ।
एकतो मनसः स्थाने तस्माद्यत्नं समाचरेत्॥ ३० ॥
प्राणनिग्रहणे ध्यानं प्राणायाम-म्-इति स्मृतम् ।
प्राण एव हि वायूनां सारथ्ये वर्तते सदा ।
प्राणनिग्रहणे योगी नित्यमभ्यासमाचरेत्॥ ३१ ॥
उत्तरोत्तरसंसिद्ध्या वायुसंचारगोचरे ।
ज्योतिःप्रवर्तनं विद्यान्नित्यमभ्यासयोजितम्॥ ३२ ॥
द्विरपाने सकृत्प्राणे समाने च त्रि – – – ।
– – – – – – – – – – – – – – – – – – – – – ॥ ३३ ॥
– – – – – – – – – – – – – – – – – – – – – ।
– – – – – – – – – – – – – – – – – – – – – ॥ ३४ ॥

---

**27**($d^4$, $d^8$) $S_1$ **30**⟨$b^3$⟩($d^3$, $d^7$)⟨$c^8$⟩ $S_1$ **32**⟨$b^3$–$b^4$⟩($b^5$, $b^7$–$b^8$) $S_1$ **33**($b^4$–$b^6$)⟨$b^7$–$c^2$⟩($c^3$)⟨$c^4$–$c^5$⟩($c^6$–$c^7$)⟨$c^8$–$d^4$⟩($d^5$)⟨$d^6$–$d^8$→⟩ $S_1$ **34**⟨←$a^1$⟩($a^2$)⟨$a^3$⟩($a^4$)⟨$a^5$–$a^7$⟩($a^8$–$b^1$)⟨$b^2$–$d^8$→⟩ $S_1$

---

**26b** °दिङ्गि° ] em. Bh (silently), °दिन्नि° $S_1$ **26c** °स्त्रयः काला ] em. Bh, °स्त्रयत्कालो $S_1$ **27b** °याभाव° ] $S_1^{pc}$Bh, °याभ° $S_1^{ac}$ (unmetrical) **27d** भगवता ] $S_1^{pc}$Bh, भवता $S_1^{ac}$ (unmetrical) **28ab** °भावान्मनसो ऽविचल° ] conj., °भावात् मनस्यविचल° $S_1^{pc}$Bh, °भावा मनस्यविचला° $S_1^{ac}$ **28c** °मुत्पत्ति° ] $S_1$, °मुत्पति° Bh (typo, unmetrical) **28d** °र्योगापत्तौ ] $S_1$, °र्योगोत्पत्तौ Bh (conj.?) • °द्भवेत् ] $S_1^{pc}$Bh, °द्भवे $S_1^{ac}$ **29d** संस्थिते ] conj. Bh, संस्थिता $S_1$ **30b** °त्साधनं ] $S_1^{ac}$Bh, °साध⏓ $S_1^{pc}$ (insertion mark after the cancelled नं, inserted akṣara possibly lost i.m.) **30c** तस्माद्य° ] em. Bh (silently), तस्मा(प्य°) $S_1^{pc}$, तस्मा(त्य°) $S_1^{ac}$ • समाचरेत् ] conj. Bh (silently), समा(च)⏓ $S_1$ **31a** प्राणनिग्रहणे ] conj. Bh, प्राणादिग्रहणो $S_1$ **32b** °संचार° ] conj., ⏓ ⏓(र°) $S_1$, – – – Bh **32c** ज्योतिः° ] $S_1^{pc}$Bh, ज्योति° $S_1^{ac}$ **33b** च त्रि– ] $S_1$ (last akṣara has vowel ए.), च ि – Bh (last akṣara has vowel ए.) **33cd** ] ⏓ ⏓ि⏓ ⏓ ˘ –ो–ा⏓ ⏓ ⏓ ⏓ ⏓ि ˘ – ˘ ⏓ $S_1$ (tops partly visible; $c^3$ has superscript र्.), – – – ि – – ो – – – – – ि – – – Bh ($c^4$ has superscript र् and $d^2$ vowel ए.) **34ab** ] ⏓ि⏓ ⏓ ⏓ ˘ – – ⏓ ि⏓ ··· $S_1$ (tops partly visible; $a^4$ has superscript र्.), – – – – ि – – – – – – – – – – – Bh ($b^1$ and $b^5$ have superscript र्.)

– – – – – – – – – – – – – – – – – – – – ।
– – – – – – – – – – – – – – – – – – – – ॥ ३५ ॥
– – – – – – – – – – – – – – – – – – – – ।
– – – – – – – – – – – – – – – – – – – – ॥ ३६ ॥
– – – – – – – – – – – – – – – – – – – – ।
– – – – – – – – – – – – – – – – – – – – ॥ ३७ ॥
– – – – – – – – – – – – – – – – – – – – ।
कुम्भ एष तृतीयस्तु योगवह्निप्रदीपकः॥ ३८ ॥
एभिर्ध्यानगतिः सूक्ष्मा वायुसंरोधकारिता ।
प्रवर्तते यया योगी परमन्वेष्टि पुद्गलम्॥ ३९ ॥
सकृदेव समाहारादसकृत्परिमोक्षणात् ।
कुम्भ-म्-एव तदुद्दिष्टं प्राणापानादिधारणात्॥ ४० ॥
प्राणो वायुरसावात्मा शरीरे जीव – – – ।
विद्याद्रूपद्वयं तस्य स्थूलं सूक्ष्मं च सर्वतः॥ ४१ ॥
अव्यक्तं सूक्ष्मरूपं तु स्थूलमाकारलक्षणम् ।
स्थूलादारभ्य सूक्ष्मं तु ध्यानाभ्यासान्निरूपयेत्॥ ४२ ॥
सूक्ष्मसंरोपणाज्ज्योतिःप्रकाशो जायते मुने ।
ध्यायतः स्थूललक्षं तु सर्वदिक्प्रसृतं मनः ।
यदा दीप्तिमदुत्पद्येत्तदाशु स्थापयेत् – – ॥ ४३ ॥

---

**35**⟨←a$^1$–a$^4$⟩(a$^5$–a$^6$)⟨a$^7$–b$^2$⟩(b$^3$)⟨b$^4$–d$^8$→⟩ S$_1$ **36**⟨←a$^1$–d$^8$→⟩ S$_1$ **37**⟨←a$^1$–d$^8$→⟩ S$_1$ **38**⟨←a$^1$–a$^2$⟩(a$^3$)⟨a$^4$–b$^8$⟩(d$^8$) S$_1$ **40**⟨b$^4$⟩(b$^5$) S$_1$ **41**⟨b$^6$–b$^8$⟩ S$_1$ **43**(f$^6$)⟨f$^7$–f$^8$⟩ S$_1$

---

**35** ] ⏓ ⏓ ⏓ ⏓ि ⏑ –ी – ⏓ ⏓ ⏓ ⏓ी ··· S$_1$ (tops partly visible), om. Bh **36–38b** ] S$_1$ (bottoms partly visible; 36a$^5$ or a$^6$ has subscript व् and 38a$^3$ vowel ऊ.), om. Bh **39c** यया ] S$_1^{pc}$Bh, ⟨या⟩+य+या S$_1$ **39d** परमन्वेष्टि ] conj., परमं वेष्टि S$_1$Bh **40b** °कृत्परि° ] conj. Bh (silently), °कृ ⏓(रि°) S$_1$ **40c** कुम्भ-म्-एव ] conj., कुम्भकमे° S$_1$ (unmetrical), कुम्भकं चै° Bh (conj.) • °दुद्दिष्टं ] em. Bh (silently), °दुर्द्दिष्टं S$_1$ **40d** प्राणापानादि° ] conj., प्राणायामादि° S$_1$Bh • °धारणात् ] S$_1^{pc}$Bh, °धारणत् S$_1^{ac}$ **41c** विद्याद्रू° ] S$_1^{pc}$Bh, विद्या रू° S$_1^{ac}$ **42d** °नाभ्यासान्नि° ] conj. Bh, °नाभ्यासन्नि° S$_1$ **43a** सूक्ष्म° ] em. Bh (silently), सूक्ष्मं S$_1$ • °णाज्ज्योतिः° ] S$_1^{pc}$Bh, °णाज्योति° S$_1$ **43b** मुने ] em. Bh (silently), मुनै S$_1$ **43c** °लक्षं ] S$_1$, °लक्ष्यं Bh (conj.) **43d** °दिक्प्रसृतं ] S$_1$, °दिक्षु सृतं Bh (conj.?) **43e** °मुत्पद्येत् ] em. Bh (silently), °मुत्पद्ये S$_1$ **43f** °येत् – – ] em., (°ये) ⏑ ⏓ S$_1$, °येत् पुनः Bh (conj.?)

गिरौ वृक्षे मरुत्पृष्ठे श्वभ्रे प्रासादपङ्क्तिषु।
समुद्रे वसुधायां वा मनःसंयोगमाचरेत्॥ ४४॥
स्थापितं तन्मनस्तत्र पुनः संहारमाव्रजेत्।
अचैतन्यं दिशेन्मोहाद्वायुपृष्ठमतो ऽन्यथा॥ ४५॥
संहृत्य च ततो व्यापि भूयो ध्यानगतिं चरेत्।
ध्यायतो नित्यमभ्यासान्मनो वायु – – – – – ॥ ४६॥
प्रवृत्तध्यानयोगस्य विषयासङ्गसक्तये।
प्रातिभानि हि विघ्नानि सत्त्वादिगुणजानि तु।
विघ्नभूतानि योगस्य प्रोद्भवन्ति हि युञ्जतः॥ ४७॥
तानि विद्वान्प्रयत्नेन विषयेच्छाविवर्जितः।
जित्वा निर्वाणमार्गस्थो भवेत्त्रैगुण्यवर्जितः॥ ४८॥
आकाशगमनं दिव्यमप्सरोगणसंगमम्।
अभिषेकश्च देवेभ्यश्चित्रकाव्यप्रवर्तनम्॥ ४९॥
ऐश्वर्यसुखसंसक्तिर्हेमरत्नागमं बहु।
सत्त्वादेतानि विघ्नानि प्रातिभानि तु लक्षयेत्॥ ५०॥
उन्मत्तमदयुक्तानि भिन्नाचारक्रमाणि तु।
रजोविघ्नानि संविद्यात्प्रातिभानि न संशयः॥ ५१॥
क्षयशूलज्वरोन्मादकुष्ठसर्पग्रहाणि तु।
यातनोद्गमपूर्वाणि तामसानि विनिर्दिशेत्॥ ५२॥
गुणत्रयसमुत्थानि प्रातिभानि सदा मुनिः।
युञ्जन्संलक्षयेच्छीघ्रं चिकित्सेदाशु चैव हि॥ ५३॥

---

**46**($d^4$)⟨$d^5$–$d^8$⟩ $S_1$ **47**⟨←$a^1$–$b^8$⟩ $S_2$ **49**($b^6$)⟨$b^7$–$b^8$⟩ $S_1$ **52**⟨$a^1$–$a^5$⟩($a^6$, $a^8$)⟨$b^1$–$b^2$⟩($b^3$–$b^5$) $S_1$ **53**($a^4$, $b^3$–$b^4$)⟨$b^5$⟩($b^6$–$c^3$)⟨$c^4$–$c^6$⟩($c^7$–$d^2$) $S_1$

---

**44b** श्वभ्रे ] em. Bh (silently), ष्वभ्रे $S_1$ • प्रासाद° ] $S_1^{ac}$Bh, प्रासादे $S_1^{pc}$ **44d** °संयोगमाचरेत् ] $S_1^{pc}$Bh, °सं(माच)मा(त)रे $S_1^{ac}$ **45b** °माव्रजेत् ] em. Bh (silently), °माब्रजेत् $S_1$ **45cd** °न्मोहाद्वायुपृष्ठ° ] conj., °न्मोहां वायुदृष्ट° $S_1$, °न्मोहाद्वायुर्दृष्ट° Bh (em., conj.?) **46d** वायु° ] em. Bh (silently), वा(य°) $S_1$ (bottom and right side lost) **47a** °ध्यान° ] conj., °ज्ञान° $S_1$Bh (in a note Bh suggests °ध्यान°.) **47b** °सक्तये ] $S_1$, °संक्षये Bh (conj.?) **47c** प्रातिभानि ] $S_2^{pc}$Bh, प्रतिभाति $S_1$, प्रातिभाति $S_2^{ac}$ **49b** °संगमम् ] conj., (°सं) ⏑ ⏓ $S_1$, °संगजम् $S_2$Bh **49c** अभिषेकश्च ] $S_1^{pc}S_2$Bh, अभिषेकस्य $S_1^{ac}$ **50a** °संसक्तिर् ] $S_1^{pc}$Bh, °संसक्ति $S_1^{ac}$, °संशक्तिर् $S_2$ **50b** °मं बहु ] $S_1$Bh, °मम्बहुः $S_2$ **51a** उन्मत्त° ] $S_1^{pc}S_2$, उत्पत्ति° $S_1^{ac}$Bh **52b** °कुष्ठ° ] $S_2$, °कुष्ट° Bh (typo) **52c** °नोद्गम° ] $S_1$Bh, °नोद्गाम° $S_2$ **53c** युञ्जन्संलक्षये° ] em. Bh (silently), (यञ्ज) ⏓ ⏓ ⏑ – $S_1$ (lower parts lost), युंजन्स लक्षय° $S_2$

प्राणाद्यानभिसंधाय मनः संहृत्य चैव हि।
प्राणायामेन कुम्भेन हन्याद्विघ्नानि सर्वतः॥ ५४॥
रजः सत्त्वं तमश्चैव प्रधानस्य गुणास्त्रयः।
तस्यैव हि महेशस्य प्रजासंसर्गहेतवः।
योगमोहाद्भवन्त्येते साभिमानस्य युञ्जतः॥ ५५॥
निरीहो निर्वृतो योगी सचेता घटते यदा।
प्रातिभानि तदा यान्ति विघ्नानि हि समं क्षयम्।
प्रादुर्भावस्ततस्तेषां गुणानां मोहकारणम्॥ ५६॥
तमो रौद्रं विजानीयात्सत्त्वं ब्रह्मणि संस्थितम्।
रजस्तु वैष्णवं विद्यात्तेषां हर्ता महेश्वरः॥ ५७॥
महादेवं परं ज्ञात्वा योगाभ्यासरतो द्विजः।
गुणत्रयविनिर्मुक्तः शंकरे लयमाप्नुयात्॥ ५८॥
यमैः सनियमैः पूर्वं शोधयेदात्मनस्तनुम्।
ततः शास्त्रप्रणीतेन धर्माधर्मविवर्जितः।
क्रमेण सोपदेशेन ध्यानाभ्यासं समाचरेत्॥ ५९॥
शब्दादीन्विषयाञ्जित्वा त्वगादीन्द्रियगोचरान्।
समो दैवततिर्यक्षु निर्ममः सर्ववस्तुषु॥ ६०॥
सर्वारम्भविनिर्मुक्तः पुण्यपापविवर्जितः।
निर्द्वन्द्वे विजने देशे योगाभ्यासं समाचरेत्॥ ६१॥
साभिमानं सनियमं त्यक्त्वा सांख्यविनिश्चयम्।
परे माहेश्वरे योगे नित्यमभ्यासमाचरेत्॥ ६२॥

---

**54**($a^2$–$a^3$) $S_1$ **55**($a^4$, $c^1$–$d^7$) $S_1$ **56**($c^3$) $S_1$, ($c^2$–$c^3$) $S_2$ **57**($d^2$) $S_1$ **58**($d^5$, $d^8$) $S_2$ **60**($a^8$) $S_1$ **61**⟨$b^1$–$b^4$⟩($b^5$–$c^3$) $S_2$ **62**⟨$c^1$⟩($c^2$, $c^7$–$c^8$) $S_2$

---

**54a** प्राणाद्या॰ ] $S_1$Bh, प्रणाद्या॰ $S_2$ • ॰संधाय ] $S_2^{pc}$Bh, ॰सम्बन्धा $S_1^{pc}$, ॰स(य)न्धा $S_1^{ac}$, ॰स–य $S_2^{ac}$ **54c** ॰यामेन ] $S_2$Bh, ॰यामेव $S_1^{pc}$, ॰यामेत $S_1^{ac}$ **55b** प्रधानस्य ] $S_1$Bh, प्रधान्यस्य $S_2^{pc}$, प्राधान्यस्य $S_2^{ac}$ **55e** ॰मोहाद्भ॰ ] $S_1$Bh, ॰मोहोद्भ॰ $S_2$ **56c** प्रातिभानि ] $S_2$Bh, प्राति(भा)ति $S_1$ **56d** समं ] $S_1^{pc}S_2$Bh, मसं $S_1^{ac}$ **56e** प्रादुर्भावस्तत॰ ] $S_1^{pc}S_2$Bh, प्र(णदा)दुद्भव॰ $S_1^{ac}$ **57cd** विद्यात्ते॰ ] $S_2^{pc}$Bh, विंद्यात्ते॰ $S_1^{pc}$, विंद्या ते॰ $S_1^{ac}$, विद्या ते॰ $S_2^{ac}$ **57d** हर्ता ] $S_1$, हन्ता $S_2$Bh **58d** लयमा॰ ] $S_1^{pc}S_2^{pc}$Bh, लमा॰ $S_1^{ac}S_2^{ac}$ **59a** ॰नियमैः ] $S_1^{pc}S_2$Bh, ॰नियमै $S_1^{ac}$ **59b** ॰न-स्तनुम् ] $S_1$Bh, ॰नः स्तनुम् $S_2$ **59d** ॰वर्जितः ] $S_1^{pc}S_2^{ac}$Bh, ॰वर्ज्जिता $S_1^{ac}$, ॰वर्जनात् $S_2^{pc}$ **60b** त्वगादी॰ ] $S_1S_2^{pc}$, (न्द)गादी॰ $S_2^{ac}$, श्रोत्रादी॰ Bh (conj.) • ॰गोचरान् ] $S_1S_2^{pc}$Bh, ॰गोचरात् $S_2^{ac}$ **60c** दैवत॰ ] $S_2$Bh, देवत॰ $S_1$ **60d** निर्ममः ] $S_1^{pc}S_3$Bh, निर्म्मगस् $S_1^{ac}$ **61a** निर्द्वन्द्वे विजने ] $S_1S_2$, निर्द्वन्द्वो निर्जने Bh (conj.) **61d** ॰भ्यासं समा॰ ] $S_2$Bh, ॰भ्यास समा॰ $S_1^{ac}$, ॰भ्यासंमा॰ $S_1^{pc}$ (unmetrical) **62b** त्यक्त्वा ] $S_2$Bh, त्यक्त्वां $S_1$ • ॰विनिश्चयम् ] $S_2$Bh, ॰विधश्चयम् $S_1$ **62d** ॰मभ्यास॰ ] $S_1S_2$, ॰मम्यास॰ Bh (typo)

अष्टौ प्रकृतयो नित्या विकाराश्चैव षोडश।
पुरुषः पञ्चविंशश्च सांख्यसिद्धान्तगोचरः॥ ६३॥
एतदेव परं ब्रह्म सांख्यानां तत्त्वनिश्चये।
प्रकृतेरन्तरं ज्ञात्वा पुरुषस्य च मुच्यति॥ ६४॥

इति स्कन्दपुराणे चतुःसप्तत्युत्तरशततो ऽध्यायः॥ १७४॥

---

**63**⟨$a^1$–$a^2$⟩($a^3$–$b^4$) $S_2$ **64**($b^8$) $S_2$

---

**63b** षोडश ] em. Bh (silently), षोडशः $S_1S_2$ **64a** एतदेव ] $S_1^{pc}S_2$Bh, एते दैव॰ $S_1^{ac}$ • ब्रह्म ] $S_1$, ब्रह्मं $S_2$, गुह्यं Bh (conj.) **64b** तत्त्व॰ ] $S_1^{pc}S_2$Bh, नत्व॰ $S_1^{ac}$ • ॰निश्चये ] $S_1^{pc}$Bh, ॰निश्च-येत् $S_1^{ac}$, ॰निश्च(येः) $S_2$ **64c** प्रकृतेर॰ ] $S_1^{pc}S_2$Bh, प्रकृतोर॰ $S_1^{ac}$ **64d** मुच्यति ] em., मुच्यतीति $S_1^{pc}S_2$ (इति part of col.), मुच्य(तो)ति $S_1^{ac}$, मुच्यते Bh **Col.** ⊙ ॥ स्कन्दपुराणे ध्यानविधौ +प्रथ+ आध्यायः २२२ (in letter numerals)॥ ⊙ $S_1$, ⊙ ॥ (स्क)न्दपुराणे चतुस्सप्त्युत्तरशतो ध्यायः॥ ⊙ $S_2$, इति स्कन्दपुराणे पाशुपतयोगवर्णनं नाम ध्यानविधौ प्रथमोयं चतुःसप्तत्युत्तरशततमोध्यायः Bh